# શ્રી કૃષ્ણાષ્ટક સ્તોત્રં

પાલયાચ્યુત પાલયાજિત પાલયા કમલાલય|
લીલયા ધૃત ભૂધરાંબુરુહોદર સ્વજનોદર || ધ્રુવ ||
મધ્વમાનસપદ્મભાનુસમં સ્મર પ્રતિ સંસ્મર
સ્નિગ્ધનિર્મલશીતકાંતિલસન્મુખં કરુણોન્મુખં|
હૃદ્યકંબુસમાનકંધરમક્ષયં દુરિતક્ષયં
સ્નિગ્ધસંસ્તુત રૂપ્યપીઠકૃતાલયં હરિમાલયં || ૧ ||
અગંદાદિસુશોભિપાણિયુગેન સંક્ષુભિત્યેનસં
તુંગમાલ્યમણીંદ્રહારસરોરસં ખલનીરસં|
મંગલપ્રદમંથદામવિરાજિતમ ભજતાજિતં
તં ગૃણે વરરૂપ્યપીઠકૃતાલયં હરિમાલયં || ૨ ||
પીનરમ્યતનૂદરં ભજ હે મનઃ શુભ હે મનઃ
સ્વાનુભાવનિધર્શનાય દિશંતમર્થિ સુશંતમં
આનતોઽસ્મિ નિજાર્જાનપ્રિયસાધકં ખલબાધકં
હીનતોજ્ઝિત રૂપ્યપીઠકૃતાલયં હરિમાલયં || ૩ ||
હૈમકિંકિણિમાલિકારસનાંચિતં તમવંચિતં
રત્નકાંચનવસ્ત્રચિત્રકટિં ઘનપ્રભયા ઘનં|
કમ્રનાગકરોપમોરુમનામયં શુભધીમયં
નૌમ્યહં વરરૂપ્યપીઠકૃતાલયં હરિમાલયં || ૪ ||

વૃત્તજાનુમનોજ્ઞજંઘમમોહદં પરમોહદં
રત્નકલ્પનખત્વિષા હૃતહૃત્તમસ્તુતિમુત્તમં|
પ્રત્યહં રચિતાર્ચનં રમયા સ્વયા ગતયા સ્વયં
ચિત્ત ચિંતય રૂપ્યપીઠકૃતાલયં હરિમાલયં || ૫ ||
ચારુપાદસરોજયુગ્મરુચામરોચ્ચયચામરો
દારમૂર્ધજભારમંડલરંજકં કલિભંજકં|
વીરતોચિતભૂષણં વરનૂપુરં સ્વતનૂપુરં
ધારયાત્મનિ રૂપ્યપીઠકૃતાલયં હરિમાલયં || ૬ ||
શુવાદિમનોઽતિદૂરતરાગમોત્સવદાગમં
સત્કવીંદ્રવચોવિલાસમહોદયં મહિતોદયં|
લક્ષયામિ યતીશ્વરૈઃ કૃતપૂજનં ગુણભાજનં
ધીકૃતોપમરૂપ્યપીઠકૃતાલયં હરિમાલયં || ૭ ||
નારદપ્રિયમાવિશાંબરુહેક્ષણં નિજરક્ષણં
તારકોપમચારુદીપચયાંતરે ગતચિંતરે|
ધીર માનસ પૂર્ણચંદ્રસમાનમચ્યુતમાનમ
દ્વારકોપમરૂપ્યપીઠકૃતાલયં હરિમાલયં || ૮ ||
રૂપ્યપીઠકૃતાલયસ્ય હરેઃ પ્રિયં દુરિતાપ્રિયં
તત્પદાર્ચકવાદિરાજયતીરિતં ગુણપૂરિતં|
ગોપ્યમષ્ટકમેતદુચ્ચમુદે મમ સ્ત્વિહનિર્મમ

www.yousigma.com

પ્રાપ્ય શુદ્ધફલાય તત્ર સુકોમલં હૃતધીમલં || ૯ ||

|| ઇતિ શ્રી મદ્વાદિરાજપૂજ્યચરણ વિરચિતં શ્રી કૃષ્ણાષ્ટક સ્તોત્રં સંપૂર્ણ||

|| ભારતીરમણ મુખ્યપ્રાણાંતર્ગત શ્રી કૃષ્ણાર્પણમસ્તુ ||

www.yousigma.com